विद्याऽमृतमश्नुते

# PRINCE SCHOOL

Rajasthan Board, English & Hindi Medium, Class IV to XII (Science, Commerce, Arts & Agriculture)

www.princeeduhub.com | Palwas Road, Sikar. Helpline : 9610-69-2222 | princeeducationhubsikar

## Model Paper - I : 2024-25

**Class - XII**

**Time : 3:15 Hours** | **Subject : Sanskrit Literature** | **M.M. : 80**

***GENERAL INSTRUCTIONS TO THE EXAMINEES:***

***परीक्षार्थियों के लिए सामान्य निर्देश:-***

- ***Candidate must write first his/her Roll No. on the question paper compulsory.***
  ***परीक्षार्थी सर्वप्रथम अपने प्रश्न पत्र पर नामांक अनिवार्यत: लिखें।***
- ***All the questions are compulsory.***
  ***सभी प्रश्न हल करने अनिवार्य हैं।***
- ***Write the answer to each question in the given answer-book only.***
  ***प्रत्येक प्रश्न का उत्तर दी गई उत्तर-पुस्तिका में ही लिखें।***
- ***For questions having more than one part, the answers to those parts are to be written together in continuity.***
  ***जिन प्रश्नों में आन्तरिक खण्ड है, उन सभी के उत्तर एक साथ ही लिखें।***
- ***Write down the serial number of the question before attempting it.***
  ***प्रश्न का उत्तर लिखने से पूर्व प्रश्न का क्रमांक अवश्य लिखें।***

### खण्ड-अ

**01. वस्तुनिष्ठप्रश्ना:-**

(i) योग: केषु कौशलम्? 1

(1) कर्मसु (2) धनेषु (3) जनेषु (4) नृपेषु

(ii) 'शुकनासोपदेश:' इति पाठ: कस्मात् ग्रन्थात् संकलित:? 1

(1) शुकसप्तातित: (2) कादम्बर्या: (3) हर्षचरितात् (4) हितोपदेशात्

(iii) परमापदां पदं किम्? 1

(1) विवेक: (2) ज्ञानम् (3) अविवेक: (4) सम्पदं

(iv) मानव: अविद्यया किं तरति? 1

(1) विद्याम् (2) मृत्युम् (3) अमृतम् (4) संसारम्

(v) कौत्स: कस्य शिष्य: आसीत्? 1

(1) वसिष्ठस्य (2) वरतन्तो: (3) विश्वामित्रस्य (4) कश्यपस्य

(vi) 'धानस्य' इत्यत्र क: गण:? 1

(1) यगण: (2) तगण: (3) जगण: (4) भगण:

(vii) "कुसुमै: पश्य सौमित्रे! क्रीडन्निव समन्तत:।" अत्र कोऽलङ्कार:? 1

(1) रूपकम् (2) उत्प्रेक्षा (3) अनुप्रास: (4) उपमा

(viii) 'याच् + शानच्' इत्यत्र किं पदं भवति? 1

(1) याचकम् (2) याञ्चमानौ (3) याचमान: (4) याचन:

(ix) 'गणेश:' इत्यत्र क: सन्धि:? किं च सूत्रम्? 1

(1) यण् (इकोयणचि) (2) दीर्घ: (अक: सवर्णे दीर्घ:)

(3) गुण (आद्गुण:) (4) अयादि (एचोऽयवायाव:)

(x) अश्वमेध इति नाम केषां महान् उत्कर्षनिकष:? 1

(1) ब्राह्मणानाम् (2) वैश्यानाम् (3) क्षत्रियाणाम् (4) धनिकानाम्

**02. रिक्तस्थानानि पूरयत- (प्रकृतिप्रत्यय-संयोगं कृत्वा लिखत)**

(i) अयि जात! _______ कथय। (कथ् + तव्यत्) 1

(ii) गुरु: सर्वदा _______ भवति। (पूज् + अनीयर्) 1

(iii) बालका: _______ तत्र गच्छन्ति। (पठ् + तुमुन्) 1

(iv) ह्य: बालक: विद्यालयं _______। (गम् + क्तवतु) 1

**03. अतिलघुत्तरात्मक प्रश्न-**

(i) अभिज्ञानशाकुन्तलस्य नायक: क:? 1

(ii) बालचरितनाटकस्य रचयिता क:? 1

(iii) किरातार्जुनीयस्य रचयिता क:? 1

(iv) "शिशुपालवधम्" इति महाकाव्यस्य रचयिता क:? 1

(v) 'आधुनिक बाण:' क: कथ्यते? 1

(vi) श्रीपद्मशास्त्री कं महाकाव्यं रचितवान्? 1

(vii) 'हरनामामृतम्' महाकाव्यस्य नायक: क:? 1

(viii) 'आदर्श-रमणी' इति उपन्यासस्य रचयिता क:? 1

(ix) मेघदूतस्य रचयिता क:? 1

(x) यजुर्वेद: कति भागेषुविभक्त:? 1

**04.** अधोलिखित-श्लोकांशस्य अलंकारस्य लक्षणं लिखत- 2

"हंसीव कृष्ण ते कीर्ति: स्वर्गगङ्गामवगाहते।"

**खण्ड-ब**

**05.** अधोलिखितयो: छन्दसो: एकस्य छन्दस: लक्षणमुदाहरणं च लिखत- 2

(i) अनुष्टुप (ii) मालिनी

**06.** अधोलिखित-श्लोकांशस्य गणचिह्नं प्रदर्शयन् छन्दस: नामोल्लेखंकुरूत- 2

"भवति नम्रास्तरव: फलोद्गमै।"

**07.** हिन्दीभाषायां सप्रसंगं भावार्थं लिखत- 2

"उपभोक्तृणामपि अभियोगो नास्ति विभागस्य विपक्षे।"

**08.** अधोलिखितश्लोकस्य अन्वयं लिखत- 2

नियतं कुरू कर्म त्वं कर्म ज्यायो ह्यकर्मण:।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मण:।।

**09. अधोलिखितपदानां सूत्रोल्लेखपूर्णकं संधिविच्छेदं कुरूत-** 2+2=4

(i) षडानन: (ii) नमस्ते

**10. अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-**

मानवस्य बौद्धिकविकासाय ज्ञानवर्धनाय च पुस्तकालयानां महत्त्वपूर्णं स्थानं वर्तते। पुस्तकालयेषु विविधपुस्तकानां संग्रहों भवति। अत्र विविधाभाषाणां पत्र-पत्रिकादयोऽपि प्रतिदिनं आयान्ति। अस्माकं पुस्तकालय: नगरस्य रमणीये स्थाने वर्तते। अस्मिन् दशसहस्राणि पुस्तकानि सन्ति। अस्माकं पुस्तकालये हिन्दी-आंग्ल संस्कृतभाषाणां पत्र-पत्रिका: प्रतिदिनं आयान्ति। अस्य समीपे एक: वाचनालय: वर्तते। यत्र बहव: जना:, छात्रा:, युवतयश्च प्रतिदिनं आगत्य स्वाध्यायं कुर्वन्ति। अस्माकं पुस्तकालयस्य भवनं विशालं रमणीयञ्च वर्तते। अस्य पुस्तकालयस्य

सर्वे जना: प्रशंसा: कुर्वन्ति। अस्माकं ज्ञानवर्धनाय अस्य महती भूमिका वर्तते। अयम् एक: आदर्श: पुस्तकालय: विद्यते।

(क) एकपदेन उत्तरत- ½×2=1

(i) कस्य सर्वे जना: प्रशंसां कुर्वन्ति?

(ii) पुस्तकालये केषां संग्रहो भवति?

(ख) पूर्णवाक्येन उत्तरत- 2+2=4

(i) अस्माकं पुस्तकालयं कुत्र वर्तते?

(ii) पुस्तकालयस्य भवनं कीदृशं वर्तते?

(ग) भाषा-सम्बद्धकार्यम्- 1+1=2

(i) 'पत्र-पत्रिका:' इति कर्तृपदस्य क्रियापदं किम्?

(ii) 'रमणीये स्थाने' - अत्र विशेषणपदं किम्?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। 1

## खण्ड-स

**11. अधोलिखितं पठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

एवं समतिक्रामत्सु दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षु: प्रतिहारानुपकरण सम्भारसंग्रहार्थमादिदेश। समुपस्थितयौवराज्याभिषेकं च तं कदाचिद् दर्शनार्थमागतारूढविनयमपि विनीततरमिच्छन् कर्तुं शुकनास: सविस्तरमुवाच।

(i) यथानिर्देशं उत्तरं लिखत-

(क) राजा कस्य यौवराज्याभिषेक: कर्तुं ऐच्छत्? (एकपदेन उत्तरत) 1

(ख) राजा प्रतीहारान् किमर्थम् आदिदेश? (पूर्णवाक्येन उत्तरत) 2

(ii) भाषिककार्यम् - (प्रदत्तविकल्पेभ्य: उत्तरं चिनुत)

(क) 'अवाच' इति क्रियापदस्य अत्र कर्तृपदंकिम्? 1

(1) राजा (2) शुकनास: (3) चन्द्रापीड: (4) मन्त्री

(ख) 'अविनयम्' इति पदस्य विलोमपदं किम्? 1

(1) सभारम् (2) आगतम् (3) विनीतरम् (4) विनयम्

**12. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-**

तमध्वरे विश्वजिति क्षितीशं
नि:शेषविश्राणितकोषजातम्।
उपात्तविद्यो गुरूदक्षिणार्थी
कौत्स: प्रपेदे वरतन्तुशिष्य:।।

(क) यथानिर्देशम् उत्तरम् लिखत-

(i) वरतन्तुशिष्य क: अस्ति? (एकपदेन उत्तरत) 1

(ii) कौत्स: कीदृशस्य क्षितीशस्य समीपे गतवान्? (पूर्णवाक्येन उत्तरत) 2

(ख) भाषिक कार्यम्-

(i) 'विश्वजिति' इति विशेषणस्य विशेष्यपदं किम्? 1

(1) अध्वरे (2) नि:शेष: (3) क्षितीशम् (4) कौत्स:

(ii) 'प्रपेदे' इति क्रियापदस्य पद्यांशे कर्तृपदं किम्? 1

(1) कोषजातम् (2) तम् (3) कौत्स: (4) वरतन्तुशिष्य:

**13. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-**

लवः - (सकौतुकोपरोधविनयम्।) आर्याः! पश्यत। एभिर्नीतोऽस्मि। (इति त्वरितं परिक्रामति)।

अरून्धतीजनकौ - महत्कौतुकं वत्सस्य।

कौसल्या - अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च। भगवति! जानामि तं पश्यन्ती वञ्चितमेव। तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत् पलायमानं दीर्घायुषम्।

अरून्धती - अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते? (प्रविश्य)

(क) यथानिर्देशम् उत्तरत-

(i) कः त्वरितं परिक्रामति? (एकपदेन उत्तरत) 1

(ii) अरून्धतीजनकादयः कैः तोषिता? (पूर्णवाक्येन उत्तरत) 2

(ख) भाषिक कार्यम-

(i) 'पलायमानम्' इति विशेषणस्य विशेष्यपदं किम्? 1

(1) वञ्चितम् (2) यूयम् (3) दीर्घायुषम् (4) वयम्

(ii) 'प्रेक्षामहे' इति क्रियापदस्य कर्तृपदं किम्? 1

(1) वयम् (2) यूयम् (3) भगवति! (4) वत्सः

**14.** रेखांकितपदेषु प्रश्ननिर्माणं कुरूत- (केषांचित् त्रयाणाम्) 3

(i) <u>लक्ष्मीः</u> न परिचयं रक्षति।

(ii) योगः <u>कर्मसु</u> कौशलम्।

(iii) योगः <u>चित्तवृत्तिनिरोधः</u> कथ्यते।

(iv) <u>सामान्येन</u> उत्सर्गः कर्तव्यः।

(v) <u>वनानि</u> श्यामतां कलयन्ति।

**15.** अधोलिखितयोः अलंकारयोः कस्यचिद् एकस्य लक्षणम् उदाहरणं च लिखत। 2

(i) अनुप्रासः (ii) श्लेषः

## खण्ड-द

**16. अधोलिखितरेखांकितशब्दान् आधारीकृत्य विभक्तिं तत्कारणञ्च लिखत-**

(i) बालकः <u>ग्रामं</u> प्रति गच्छति। (ग्राम) 1

(ii) <u>गृहस्य</u> अन्तः माता विद्यते। (गृह) 1

(iii) पिता <u>पुत्राय</u> क्रुध्यति। (पुत्र) 1

(iv) सः <u>पापात्</u> जुगुप्सते। (पाप) 1

**17.** निम्नलिखितषु विषयेषु कमपिविषयोऽपरि 50-60 शब्देषु संस्कृतभाषायां निबन्धं लिखत- 5

(i) संस्कृतभाषायाः महत्त्वम्

(ii) राजस्थानप्रदेशः

(iii) अस्माकं विद्यालयः

**18.** अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादः करणीयः। (केषांचित् पञ्चानाम्) 5

(i) वह लेख लिख रहा है।

(ii) तुम सब ग्रन्थ पढो।

(iii) विद्या विनम्रता देती है।

(iv) पिता पुत्र पर क्रोध करता है।

(v) राम वन को गया।

(vi) राघव पाप से घृणा करता है।

(vii) माता पुत्र से स्नेह करती है।